देवभट्टधृतम् अत्रामुष्येयत्र षष्ठ्यन्तं संस्कार्य्यनामोल्लेख्यम् । सामवेदिनाञ्चैतत् पाठ्यं वेदभेदेऽन्यदाकरे ज्ञेयम् ।

**आयुस्** न० इण–असि णिच्च । जीवितकाले "आयुरारोग्यमतुलं देहि देवि ! नमोऽस्तु ते" देवीस्तुतिः। "आयुर्देहातिगैः पीतं रुधिरं च पतत्त्रिभिः" रघुः । "चतुर्थमायुषोभागमुषित्वाद्यं गुरौ द्विजः । द्वितीयमायुषोभागं कृतदारो गृहे वसेत्" मनुः "समारुरुक्षुर्दिवमायुषः क्षये" रघुः । "आयूंषि त्वक्षु निर्भिद्य प्राभञ्जनिरमोचयत्" भट्टिः। "अष्टमं चायुषः स्थानमष्टमादष्टमञ्च यत्" इति पराशरोक्तेः जन्मलग्नावधिके अष्टमस्थाने तृतीयस्थाने च तद्विवेच्यम् । स्थानविशेषे च ग्रहविशेषयोगदृष्ट्यादिवशात् आयुर्विशेषः अष्टमस्थाने चिन्तनीयपदार्थसहितः" सर्वा० चिन्ता० दर्शितः। यथा "मरणाज्जीवितमरणं गुप्तस्थानं च मरणहेतुञ्च । अन्तसुखमरणदेशं परिभवमपि चिन्तयेत् प्राज्ञः। रन्ध्रेश्वरे पापयुतेऽन्त्यराशावल्पायुरस्येति वदन्ति षष्ठे । तत्रापि लग्नेश्वरयोगजाते त्वल्पायुरस्येति वदन्ति सन्तः । स्वक्षेत्रसंस्थे सति रन्ध्रनाथे दीर्घायुराहुर्मुनयो महान्तः । मन्देन वा चिन्त्यमशेषमायुः स्वक्षेत्रमित्रोच्चगृहस्थितेन । रन्ध्रेश्वरेणापि युते विलग्ननाथे रिपौ वा व्ययराशियुक्ते । षष्ठान्त्यपे वा यदि लग्नयुक्ते दीर्घायुरस्येति शुभेक्षितश्चेत् । कर्मेश्वरेणापि विचिन्त्यमायुर्दीर्घं सुहृत्स्वोच्चयुतेन तेन । केन्द्रस्थितैः कर्मविलग्नरन्ध्रनाथैस्तथैवायुरुदाहरन्ति । प्रोक्तग्रहैर्व्योमचरैस्त्रिभिर्वा सभानुजैः केन्द्रगतैस्तथैव । स्वक्षेत्रकोणादिगतैर्विशेषाद्वदन्ति दीर्घायुरुदारचित्ताः । चतुरस्रे शुभैर्युक्ते लग्नेशे शुभसंयुते । गुरुणा दृष्टिसंयोगे पूर्णमायुर्विनिर्दिशेत् । केन्द्रान्विते विलग्नेशे गुरुशुक्रसमन्विते । ताभ्यां निरीक्षिते वापि दीर्घमायुर्विनिर्दिशेत् । त्रिषडायगताः पापाः शुभाः केन्द्रत्रिकोणगाः । लग्नेशे बलसंयुक्ते पूर्णमायुर्विनिर्दिशेत् । षट्सप्तरन्ध्रभावेषु शुभेशसहितेषु च । त्रिषडायेषु पापेषु पूर्णमायुर्विनिर्दिशेत् । रन्ध्राधिपे विलग्नस्थे गुरुशुक्रेक्षिते युते । लग्नेशे केन्द्रराशौ वा दीर्घमायुर्विनिर्दिशेत् । रन्ध्राधिपे तु केन्द्रस्थे गुरुशुक्रेक्षिते युते । लग्नेशे बलसंयुक्ते दीर्घमायुर्विनिर्दिशेत् । लग्नाधिपो यदा केन्द्रे लग्नादेकादशालये । सर्वग्रहकृतं रिष्टमेकोऽपि विलयं नयेत् । उच्चान्वितैस्त्रिभिः खेटैर्लग्नरन्ध्रेशसंयुतैः । रन्ध्रे पापविहीनैस्तैर्दीर्घमायुर्विनिर्दिशेत् । रन्ध्रस्थितैस्त्रिभिः खेटैः स्वोच्चमित्रस्वगेहगैः । लग्नेशे बलसंयुक्ते दीर्घमा०। पारावतादिभागस्थाः पापाः सर्वे शुभास्तथा । केन्द्रत्रिकोणनिलयाः पूर्णमायुर्विनिर्दिशेत् । षष्ठाष्टमव्यये पापा लग्नेशे दुर्बले यदि । अल्पायुरनपत्यो वा शुभदृग्योगवर्जिते । क्रूरषष्ठांशके वापि रन्ध्रेशे भानुजेऽपि वा । पापान्विते पापदृष्टे त्वल्पमायुर्विनिर्दिशेत् । चतुष्टयगते पापे शुभदृष्टिविवर्जिते । बलहीने विलग्नेशे त्वल्पमायुर्विनिर्दिशेत् । व्ययार्थौ पापसंयुक्तौ शुभदृष्टिविवर्जितौ । क्रूरषष्ठांशगौ वापि स्वल्पमायुर्विनिर्दिशेत् । आयुर्योगस्त्रिधा प्रोक्तः स्वल्पमध्यचिरायुषः । द्वात्रिंशत्पूर्वमल्पायुर्मध्यमायुस्ततो भवेत् । सप्तत्याः प्राक्, ततः पूर्णमायुरत्र वदन्ति हि । अल्पायुर्दिननाथस्य शत्रौ लग्नाधिपे यदा । समत्वे मध्यमायुः स्यान्मित्रे दीर्घायुरादिशेत् । बलहीने विलग्नेशे जीवे केन्द्रत्रिकोणगे । षष्ठाष्टमव्यये पापे मध्यमायुरुदाहृतम् । शुभे केन्द्रत्रिकोणस्थे शनौ बलसमन्विते । षष्ठे वाप्यष्टमे पापे मध्यमायुरुदाहृतम् । लग्ने त्रिकोणे केन्द्रे वा मध्यमायुश्च मिश्रिते । अल्पायुर्योगजातानां विपत्पाके मृतिप्रदः । मध्यमे प्रत्यरिर्भेशान्मृतिं दद्याद्विशेषतः । अष्टमेशदशा कष्टा पूर्णायुर्योगसंज्ञके । योगायुरिति निश्चित्य जातस्यैवं वदेद्बुधः । आयुर्विलग्नाधिपती बलेन हीनौ धरासूनुहितेशयुक्तौ । युद्धे मृतिं तस्य वदन्ति तज्ज्ञाः शस्त्रेण वा तन्मरणं विशेषात् । रन्ध्राङ्गनाथौ यदि वा रिपुस्थौ राह्वन्वितौ केतुयुतौ ससूनू । व्रणेन युद्धे मृतिमाहुरार्याः शस्त्रेण वा तन्मरणं विशेषात् । रन्ध्राङ्गनाथौ यदि वा रिपुस्थौ राह्वन्वितौ केतुयुतौ समन्दौ । तद्भुक्तिकालेऽप्यथ वा विपाके शस्त्रेण चौरैर्मरणं प्रयाति । रन्ध्राङ्गपौ वाहननाथयुक्तौ तस्मान् मृतिं तस्य वदन्ति तज्ज्ञाः । मृतिं त्वजीर्णाद्गुरुसंयुतौ तौ देहेशजीवौ रिपुगावजीर्णात् । लग्नेश्वरे वाहननाथयुक्ते वागीश्वरेणापि युते त्वजीर्णात् । देहेश्वरे वाहनवित्तभावनाथान्विते वा मरणं त्वजीर्णात् । रन्ध्रेशयोगान्मरणं दशायामन्तर्दशायामथ वा वदन्ति । पित्रादिभावाधिपयोगदृष्ट्या पित्रादिकानां मरणं तथैव । मृत्यङ्गपौ भानुसुतेन युक्तौ दुःस्थानगौ वा विषभक्षणेन । राहुध्वजाभ्यां सहितौ च दुःस्थावुद्बन्धनात्तस्य मृतिं वदन्ति । षष्ठेश्वरे भानुसुते सराहुकेतौ मृगाद्भीतिमुदाहरन्ति । जीवेन युक्ते गजभीतिमस्य जातस्य चन्द्रेण युतेऽश्वभीतिम् । सूर्य्यान्विते तादृशभानुपुत्रे मृगात्सशृङ्गात् शुनकात् सभौमे । षष्ठस्थिते भानुसुतेऽपि चैवं विना स्वतुङ्गस्वगृहं सखेटे । सुखेशभाग्येशविलग्ननाथास्त्रिकोणगाः केन्द्रगताश्च सर्वे । भुक्तौ यदा तत्परिपाककाले